भूमिनिहितैककोटि तत्” (कार्म्मुकम्) रघुः। “आवर्जितजटामौलिविलम्बिशशिकोटयः” कुमा० “तूर्द्धस्खलत्तुहिनदीधितिकोटिमेनम्” माघः “विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः” संशयहेतूक्तौ गदाधरः। “इष्टाद्बाह्वोर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः। त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः” १०लीलावत्युक्ते त्रिकोणादिक्षेत्रावयवरेखाभेदे स्त्री “तथायते तद्भुजकोटिघातः” लीला० “त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्यादयुग्युग्मसंज्ञा च तेषाम्। अयुग्मे पदे यातम् एष्यन्तु युग्मे भुजोबाहुहीनं त्रिभं कोटिरुक्ता” सि०शि० उक्ते राशिचक्रस्य ११तृतीयांशे १२तत्रोक्ते छायानिरूपणार्थे कल्प्यमानक्षेत्रावयवरेखाभेदे यथा “दिक्सूत्रसम्पातगतस्य शङ्कोश्छायाग्रपूर्व्वापरसूत्रमध्यम्। दोर्दोःप्रभावर्गवियोगमूलं कोटिर्नरात् प्रागपरा ततः स्यात्” सि० शि०” “दिक्संपातस्थस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्व्वापरसूत्रस्य च यदन्तरं स दोरित्युच्यते दोश्छाययोर्वर्गान्तरपदं पूर्व्वापरा कोटिरिति” प्रमि० १३चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं तत्रैव दर्शिते क्षेत्रावयवभेदे च यथा “योऽधो नरो दिनकृतः स विधोरुदग्रशङ्क्वन्वितो मम मता खलु सैव कोटिः” सि० शि०

“यो रवेरधःशङ्कुरसौ विधोरूर्ध्वशङ्कुना युतः सैव कोटिर्मम मता अत्रोपपत्तिः। इहार्केन्द्वोर्याम्योत्तरभावेन यदन्तरं स भुजः। ऊर्द्ध्वाधरभावेन यदन्तरं सा कोटिः। सा चैवं भवति। उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदा रविशङ्कोरभावाच्छशिशङ्कुरेव कोटिः। यदा निशि रवेरधः शङ्कुस्तदा स शङ्कुर्विधोरुदयशङ्कुना युतो यावांस्तावत् तयोर्यत्रस्थयोरूर्द्ध्वाधरमन्तरं सैव कोटिरुचिता। यतो द्रष्टा पुरुषेणात्मनोऽवस्थानवशेन शशिनः शृङ्गमुन्नतमवलोक्यम्। अतः स्वावस्थानसमसूत्रवादूर्ध्वरूपिणया कोट्या भवितव्यम्। भुजकोटिकर्णकृतं त्र्यस्रं दृष्टेरग्रत आदर्शवत् संमुखं यथा भवति तथा कल्प्यम्” प्रमि० तत्रैवोक्ते १४उदयास्तसूत्रकल्पितक्षेत्रावयवभेदे यथा “सूत्राद्दिवाशङ्कुतलं यदंशं याम्यां गतं हि द्युनिशं कुजोर्द्ध्वे। अधश्च सौम्यां निशि सौम्यमस्मात् सद्युक्तियुक्तं न्दतलं निरुक्तम्। सौम्याग्रकाग्राद्यतलं हि याम्यं याम्याग्रकाग्रात् पुनरेव याम्यम्। तदन्तरैक्यं समस्तखेटमध्यांशजीवा भुवि बाहुमाहुः। दृग्ज्यां श्रुतिं चाथ तयोस्तु कोटिं पूर्वापरां वर्गवियोगमूलम्” सि०शि०

“क्षितिजस्याहोरात्रवृत्तसंपातयोर्बद्धं सूत्रमुदयास्तसूत्रम्। ग्रहस्थानाल्लम्बः शङ्कुः। तस्य तलमुदयास्तसूत्राद्दक्षिणतो भवति। यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम्। अधस्तूत्तरतो गतम्। अतो निश्युत्तरं न्दतलम्। अथ भुज उच्यते। उत्तरगोलेऽग्रोत्तरा न्दतलं याम्यमतस्तेनोनाग्रा बाहुर्भवति। बाहुर्नाम शङ्कुप्राच्यपरसूत्रयोरन्तरम्। यदाऽग्रा शङ्कुतलादूना तदा तयोरन्तरं दक्षिणं शङ्कुतलं बाहुः स्यात्। एवं समवृत्तप्रवेशादुपरि दक्षिणगोले त्वग्रा याम्या शङ्कुतलं च याम्यं तयोर्योगे कृते बाहुः स्यात्। रविसमसण्डलयोरन्तरांशानां ज्या बाहुः। तत्र या दृग्ज्या स कर्णः। तयोर्वर्गान्तरपदं पूर्व्वापरा कोटिः” प्रमि०

“शतं शतसहस्राणां कोटिमाहुर्मनीषिणः” रामा०। तत्र संख्यायाम् “योनिकोटिसहस्रेषु सृतिं चास्यान्तरात्मनः” मनुः। “कोटिकोटिगुणितं दिवि दायि” नैष०। संख्यान्विते “कोटीश्चतस्रोदश चाहरेति” रघुः। ततो वारे कृत्वसुच्। कोटिकृत्वस् कोटिवारार्थे अव्य०। कारकार्थवृत्तेस्ततः वीप्सायां शस्। कोटिशस् वीप्सान्वितकारकरूपे तदर्थे अव्य० कोटिशोददाति। [गोपकीटे जटाधरः।

**कोटिक** पु० कोट्या बहुधा कायति प्रकाशते कै—क। इन्द्र-

**कोटिकास्य** पु० कोटिकस्येवास्यमस्य। शिविवंश्ये सुरथपुत्रे नृपभेदे “अहन्तु राज्ञः सुरथस्य पुत्रः यं कोटिकास्येति विदुर्मनुष्याः” भा० व० २६४अ०। द्रौपदीं प्रति तदुक्तिः

**कोटिजित्** पु० कोटिं कविकोटिं, पणे कोटिमितं द्रव्यं वा जितवान् जि-भूते क्विप्। रघुवंशादिकाव्यकारे कालिदासे त्रिका०।

**कोटिज्या** स्त्री सू० सि० उक्ते ग्रहस्फुटतासाधनाङ्गे चापावयवभेदे तदानयनं यथा

“गताद्भुजज्या विषमे गम्यात् कोटिः पदे भवेत्। युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत्” सू०सि०। “विषमे पदे गतादूग्रहस्य पदादितो यद्गतं राशित्रिभागात्मकं भाग ज्ञातं तस्मादित्यर्थः भुजज्या स्यात्। गम्याद्गतोनं त्रिभं ग्रहात् पदान्तावधिकमेष्यम्। तस्मात् कोटिः कोटिज्या स्यात्। युग्मे समे तुकारात् पदे एष्याद्भुजज्या, गतात् कोटिज्या स्यात् तुकारो विशेषद्योतकः। एकस्मादेवोक्तरीत्या द्वयं साधितमित्यर्थः। अत्रोपपत्तिः विषमपदे ग्रहोच्चोर्ध्वाधररेखान्तरानुसारेण फलमुत्पद्यते मतो ह-त्तान्तसदन्तरमर्धज्या भुजरूपा तदङ्गचापं तदन्तरांशा